International Journal of Sanskrit Research 2019; 5(5): 179-180

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 179-180
© 2019 IJSR
www.anantaajournal.com
Received: 07-07-2019
Accepted: 09-08-2019

**डॉ. राकेश कुमार**
असि. प्रोफेसर, राजकीय स्नातकोत्तर महाविद्यालय, मुहम्मदाबाद गोहना, मऊ, उत्तर प्रदेश, भारत

**Correspondence**
**डॉ. राकेश कुमार**
असि. प्रोफेसर, राजकीय स्नातकोत्तर महाविद्यालय, मुहम्मदाबाद गोहना, मऊ, उत्तर प्रदेश, भारत

# महाभारतस्य प्रासङ्गिकता

**डॉ. राकेश कुमार**

**प्रस्तावना**

लौकिकसंस्कृतसाहित्ये महत्त्वदृष्टया रामायणमहाकाव्यानन्तरं महाभारतस्य स्थानं महत्त्वपूर्णं विद्यते। विश्व–साहित्ये वृहत्तमः ग्रन्थः महाभारतमेव। ग्रन्थोऽयं भारतवर्षस्य सांस्कृतिकविषयाणां विराट्कोशः तथा च आचारसंहिता वर्तते। अथ च अस्मिन् ग्रन्थे भारतस्य धार्मिक–सामाजिक–सांस्कृतिक–राजनैतिक–आर्थिकादिपरिस्थितयः परम्पराः, विचारधाराश्च प्रचुरतया सन्निवेशितास्सन्ति। एतस्य मान्यता शाश्वतः सार्वकालिकः सार्वदेशिकश्च विद्यते। अभिप्रायोऽयं यत् महाभारतं न केवलं स्वकीयरचनाकालिकजीवनमूल्यानां घटनादीनाञ्च निदर्शनं कारयति, अपितु इदानीन्तनेऽपि तावदेव प्रासग्किं विद्यते, यावत् पूर्वमासीत् अग्रेऽपि तावदेव भविष्यति।

व्यासप्रणीतमहाभारतस्य अधिकांशः भागः वैयक्तिक–पारिवारिक–सामाजिक–धार्मिक–आर्थिक–राजनैतिक–नैतिक–आध्यात्मिकोपदेश–शिक्षोपाख्यानादिभिः परिपूर्णो विद्यते। योगेश्वरस्य श्रीकृष्णस्य लोकशिक्षात्मकलीलासमावेशात् महात्मनो विदुरस्य भीष्मपितामहस्यादर्शोपदेशादिभिः विश्वमुपकर्तुं शान्तिप्रदातुं च सूपयुक्ता योजना महाभारते प्रस्तुता वर्तते।

यदा देशस्य पुरतः अकर्मण्यतायाः कारणात् निर्धनता–वेरोजगारी–भुखमरीत्याख्याः गभीराः समस्याः प्रस्तुतास्सन्ति, अमुष्यां स्थितौ महर्षेः वेदव्यासस्योपदेशः 'कर्मण्येवाधिकारस्ते' अत्यन्तं महत्त्वपूर्णं विद्यते। तदनुसारं कर्मणः पराङ्मुखो जनः नास्ति मानवश्रेण्यामिति–

**'प्रकाश–लक्षणा देवा मनुष्याः कर्मलक्षणाः''** [1]

सम्प्रति समाजे जीवनमूल्यानां सातत्येन क्षरणं, स्वार्थलिप्सावर्धनं जनानां

पारिवारिककर्त्तव्यनिर्वहणं प्रभावयति, यस्मात् प्रभावितो भूत्वा पितरः निराश्रतो भूत्वा वृद्धाश्रमं प्रति पलायनं कुर्वतः दृश्यन्ते। अमुष्यां स्थितौ महर्षेः वेदव्यासस्य पारिवारिकमुपदेशाः अत्यन्तमुपादेयाः। प्रत्येकं गृहस्थैः परिवारसदस्येभ्यः भोजन–भवन–वस्त्रादीनां व्यवस्था कर्त्तव्यैव। अन्यथा सः महापापभाग् भवति–

> एकः सम्पन्नमश्नाति वस्ते वासश्च शोभनम्।
> योऽसंविभज्य भृत्येभ्यः को नृशंसतरेस्ततः।। [2]

एतेन सह महर्षिणा कौरव–पाण्डवयुद्धद्वारा गृहकलहात् भारतीयसमाजः सचेष्टितः यत् पारिवारिकाणां परस्परं वैयक्तिकं व विभाजनमेव विनाशस्य कारणमस्ति।

वर्तमानकाले सामाजिकाः यथा नैतिकता–सदाचारादिकं परित्यज्य धनप्राप्तये उत्सुकाः सन्ति। एतस्यां स्थितौपुनः वेदव्यासस्य नैतिकशिक्षा समाजाय अत्यन्तमुपयोगिनी वर्तते। धनापेक्षया सदाचारः सयत्नं रक्षणीयः–

> वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
> अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः।। [3]

एवमेव महर्षिणा प्रतिपादिता राजनीतिः, कूटनीतिः छद्मनीतिसदृशनीतिपरकाः शिक्षाः प्रत्येकं राज्याय राज्ञे च अत्यतोपयोगिन्यः। महाभारतस्योद्योगपर्वणि मन्त्री–मन्त्रणा–स्थानं–करः, सन्धि, विग्रहादि षट्गुणाः, नैकविषयाः च विस्तरेण प्रतिपादिताः। एवमेव राज्ञः प्रजायाः, द्वयोः सम्बन्धाय चादर्शचित्रणं प्रस्तुतम्–

राजा प्रजानां प्रथमं शरीरं
प्रजाश्च राज्ञोऽप्रतिमं शरीरम्।
राज्ञा विहीना न भवन्ति देशाः
देशैर्विहीना न नृपाः भवन्ति।। [4]

राष्ट्रस्य, केन्द्रस्य, प्रजायाश्च सर्वतोभावेन मंगलसाधकः भवति राजा। अतो राज्यविकासः प्रजासु राष्ट्रियभावनाः अभिवृध्यर्थं राजा जागरुको भवतु। इत्थं राजनेतृभिः विलक्षणमादर्शं समुपस्थापयति महाभारतम्।
महर्षिवेदव्यासप्रणीतं महाभारतं वास्तविकरूपेण धर्माध्यात्मादीनाञ्च विश्वकोषः विद्यते। धर्म–दर्शनम् इत्येतौ भारतीयसंस्कृतेः प्रतिष्ठे प्राणरूपे च स्तः ययोः आश्रयणेन भारतः विश्वगुरु आसीत्। अधर्माचरणेन देशनाशः धर्माचरणेन राष्ट्राभ्युत्थानं सुष्ठुरीत्या आख्यानोपाख्यानैः प्रतिपादितमस्ति महर्षिणा। अतः धर्मस्य परित्यागः यस्यां कस्यामपि दशायां नोचितः यतो हि धर्मः शाश्वतः चिरस्थायी चास्ति। पुनश्च मानवजीवनस्याभ्युन्नतये धर्मार्थकाममोक्षेति पुरुषार्थचतुष्टयानामपि प्रतिपादनं महाग्रन्थेऽस्मिन् विशेषेण कृतं वेदव्यासेन न तथाऽन्यत्र प्राप्यते–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।। [5]

महर्षिः वेदव्यासः महाभारते सदुपदेशैराख्यानैर्वा मानवजीवनं समुन्नेतुं प्रयत्नञ्चकार।
शाकुन्तलोपाख्यान–रामोपाख्यान–सावित्र्युपाख्यान–नलोपाख्यानादिभिर्या शिक्षा प्राप्यते सा तु साम्प्रतिकाय समाजाय अत्यन्तमुपादेयः सदा अनुकरणीयश्च।
संस्कृतसाहित्यस्य सर्वश्रेष्ठग्रन्थः श्रीमद्भगद्गीता महाभारतस्यैवांशः, एष ग्रन्थः मानवधर्मस्य हिन्दू सनातनधर्मस्य च धर्मग्रन्थः अस्ति। एष ग्रन्थः महर्षेः वेदव्यासस्य विलक्षणकाव्यप्रतिभायाः परिचायकोऽप्यस्ति। एष मात्रं ग्रन्थः यस्मिन् भक्ति–ज्ञान–कर्मेति त्रयाणां त्रिवेणी सततं प्रवहति। गीतायाः माहात्म्यं पद्येनानेन स्फुटति–

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।। [6]

वैदिकोत्तरव्यासवाङ्मयात् मध्यकालीनभारतीयसमाजस्य चिन्तनधारा सर्वतोभावेन प्रभाविता विद्यते, न तथा अन्यस्मात्। उच्यते हि–

सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति।
पर्जन्य इव भूतानामक्षयो भारतद्रुमः।। [7]

संक्षेपेणात्र वक्तुं शक्यते यत् कृष्णद्वैपायनमहर्षेः वेदव्यासस्य कालजयीकृतिः 'महाभारतम्' प्रथमतया यत्र सहृदयान् काव्यरसरसिकान् कवीन् अनन्तानन्तकालं यावत् प्रेरणास्रोतः वर्तते, तत्रैव अस्मिन् वर्णिताः विषयाः मानवजीवनं संस्कुर्वन्तः धार्मिक, सामाजिक–सांस्कृतिक–आर्थिक–राजनीतिक–आध्यात्मिक शिक्षयाभिः न हि केवलं भारतमपितु समग्रमपि विश्वमालोकयिष्यन्ति।
महर्षेः व्यासस्य साहित्यानि न केवलं भारतीयानां कृतेऽपितु सम्पूर्णजगतः कृते अनुशीलनीयं सन्ति। पुनश्च भारतीयभावुकेभ्यः नित्यं पठनीयानि, प्रातः वन्दनीयानि, मुमुक्षुजनेभ्यः सदाचिन्तनीयानि च सन्ति। विश्वकल्याणाय अनुकरणीयानि च सन्ति

**सन्दर्भ सूची**

1. महा0, आश्वमेधिक0, 43/27
2. महा0, उद्योग0, 33/4
3. महा0, उद्योग0, 36/30
4. महा0, शान्ति0, 67/59
5. महा0, आदि0, 62/53
6. महा0, भीष्म0, 43/1
7. महा0, आदि0, 1/92